मनुष्यविभवनिर्वहणे भगवद्गीतापद्धतिः

Dr. Harikrishna Sarma K.N.
(Assistant Proffesor, Sree Sankara College, Kalady)

मनुष्यविभवः इति पदं कालेऽस्मिन् प्राधान्येन प्रयुज्यमानं दृश्यते। जनसङ्ख्यावृद्ध्यनुसारेण समाजाभिवृद्धिकराणां स्रोतसामभावमतिवर्तयितुं साम्प्रतिकैर्विद्वद्भिरुन्नीतमिदं पदं भोक्तृ-भोग्ययोः सामानाधिकरण्यं सूचयति। समाजे धार्मिकं आर्थिकं वा यद्यत्समुपजायते, तस्मिन् सर्वस्मिन्नपिमनुष्यविभवस्य समाहारः विनियोगश्च अवधानतयैव कर्तव्याविति तेषां मतम्। तस्यैव मनुष्यविभवस्य प्रयोगचारुतया शान्तिपुष्टी, प्रयोगवैकल्येन संग्रामसन्तापौ च समापद्यन्ते। आशयमिदं पुरस्कृत्य मनुष्यविभवनिर्वहणनाम्नी नव्या काचिद्वैज्ञानिकी शाखा विकासमवाप्ता। मनुष्यविभवनिर्वहणं नाम कस्मिंश्चिदपि समाजे घटनात्मकान् सांस्कृतिकान् वैयक्तिकांश्च सङ्केतानुपयुज्य स्पर्धाधिष्ठितलाभावाप्तये योग्याणां संस्थाविधेयानां समर्पितानां च मनुष्याणां विस्तारः एव भवति। यद्यपीदृशं मनुष्यविभवनिर्वहणं वैशिष्ट्येनाधुनिक एव काले संप्रसारितं, तथापि चिरादेव कालादारभ्यास्य प्रयुक्तिर्बभूव। उपभोगाधिष्ठितस्यागोलसमाजस्य तात्पर्येण नवीनतयेयं शाखोन्नीता चेत् प्राचीनैः समाजस्य धार्मिकमार्थिकं च समतुलनं संरक्षितुमेव सङ्केतमिदं प्रयुक्तमिति द्रष्टुं शक्यते। मनुष्यविभवनिर्वहणस्य प्राचीनः आशयः भगवद्गीताप्रभृतिषु स्मृतिष्ववलोक्यते।

समस्या

मनुभ्यविभवनिर्वहणं प्रति विस्तृतं प्रकृष्टञ्चाध्ययनं यद्यपि कालेऽस्मिन् प्रचाल्यते, तथापि तच्छुष्कमेवेति वक्तव्यं भवति। भोक्तृभोग्ययोः सामानाधिकरण्यं

भजन्तीयं शाखा मनुष्यं कमप्युभोगवस्तुं गणयति। तस्य वस्तुनः उपभोक्ता अन्यः कश्चन मनुष्यः एव। अस्मात् तत्त्वात् अस्याः शाखायाः प्रयुक्तिः आर्थिकासु वाणिज्यासु च संस्थासु एव दरीदृश्यते। ताः संस्थाः स्वकीयायार्थिकलाभाय मनुष्यं विभवं मत्वा चूषणेनात्यन्तं दूषयन्ति च। अतः मनुष्यस्य स्वत्वं, तस्य जन्मनः साफल्यं च प्रति शाखायाः अस्याः चिन्ता अद्यापि न प्रसृतेति वक्तुं शक्यते। स्वीयं जीवनकालं सर्वमपि अन्यस्यार्थिकलाभाय समर्पयन् भौतिकमेव जीवनं यथार्थमिति चिन्तयंश्च मनुष्योऽस्तं यातीत्येषाधुनातना दुरवस्था। उपभोगतृष्णायाः बहिरागत्य धार्मिकानि मूल्यान्यवगन्तुं त्यागादीनां सुखमनुभोक्तुञ्च स बिभेत्येव। अस्यैव फलत्वेन मनुष्यविभवस्य प्रयोगवैकल्यता तज्जन्याः समाजासन्तुलिततताश्चोपजायन्ते। अतः असन्तुलितं मनुष्यविभवनिर्वहणवीक्षणमेव संप्रति विद्यत इति ज्ञायते। अत्र प्राचीनसंविधानात् के केऽंशाः स्वीकार्याः इति विचार्यन्ते। भगवद्गीता तादृशं किमपि संविधानं अस्माकं पुरतः प्रदर्शयति। तत्र निर्वाहकः कृष्णः विभवमर्जुनं न केवलं स्वधर्मानुष्ठानाय किन्तु स्वजन्मनः साफल्याय च परिवर्तयति। अत्र स्वधर्मस्य प्राधान्यं समाजे सर्वत्र विभवनिर्वहणायापेक्षितं भवति। समाजस्य सुस्थित्यै क्षेमाय च यद्यदावश्यकं भवति तेषां संवर्धनाय सुविभक्तं धर्मचक्रं अत्यन्तापेक्षितं वर्तते। तस्य धर्मचक्रस्य तालनिबद्धेन चंक्रमणेनैव विभवसमाहारः प्रयुक्तिश्च विजयं नेष्यतः। अतः वार्तमानिकमनुष्यविभवनिर्वहणस्य मनुष्यत्वविधूननप्रकृतेः परिहाराय भारतीयसंस्कृतेः प्रयुक्तौ का युक्तिरिति समस्या इह समुदेति।

पूर्वावलोकनम्

मनुष्यविभवनिर्वहणस्य लाभालाभावधिकृत्य बहवो विद्वांसः बहुधा प्रतिपादितवन्तः। बहवोऽन्ये तु भारतीयदर्शनानां स्मृतीनां वा सामाजिकसाङ्गत्यं विमृश्याधीतवन्तः। उभयत्रापि विद्यमानस्य लाभस्य सर्वैः ज्ञातत्वात्, असङ्गतासन्देहेष्वेव उभयोस्सहकृतेः संभवाच्च मनुष्यविभवनिर्वहणविषये विद्वद्भिरुभयत्र यत्सन्दिग्धं तदवलोक्यते।

साम्प्रतिकमनुष्यविभवनिर्वहणप्रणालिषु व्यक्तिजीवितस्य सोद्देश्यता, धार्मिकता च न्यूनातिन्यूनतया परिगण्येते इति कष्टा स्थितिः। इमां दुरवस्थामाधारीकृत्य तत्संविधानस्येष्टाः अंशाः विद्वद्भिः पञ्चधा प्रदर्शिताः। ते तु मनुष्यविभवस्य

कार्यकारिणः व्यक्तिप्रभावक्षयः, संविधानस्य असन्तुलितः आर्थिकव्ययः, वैकारिकवीक्षणस्यापक्वता, मूल्यनिर्णये विषमता इत्येते भवन्ति[1]। भौतिकवृद्धौ संस्थायाः प्राबल्यार्जने च बद्धश्रद्धमिदं संविधानं कार्यकारिणां सामर्थ्यं, प्रावीण्यं, विज्ञानं च तादृशेषु विषयेष्वेव प्रयुञ्जति। ततः बहुप्रकारेण प्रस्तारितं व्यक्तेः सामर्थ्यादिप्रचयं एकमुखं, तच्चात्मलाभशून्यं च विधत्ते। ततः स्वजीविते निर्लक्ष्यता हताशता चोपजायेते। तदतिवर्तयितुं संस्थाः व्यक्तीन् भ्रमोपजीविनः विदधते; ततश्चार्थिको लाभ एव जीवितलाभः, भौतिकः सुख एव जीवितसाफल्यप्रदायक इत्येवं कृशाति कृशमन्तस्सारशून्यं च जीवितदर्शनं व्यक्तिषूत्पाद्यते। अनन्तरं कार्यकारिषु प्रकृत्यैव सम्पादनीयान् प्रयत्नादिगुणान् सामर्थ्यविशेषांश्च अमिततयाधिकतयाऽचिरेण चापहर्तुं संस्थाः भूर्येव धनं व्ययीकुर्वन्ति। तत्फलत्वेन स्पर्धा, आर्थिकासन्तुलना, वञ्चना, अधार्मिकता चोपजायन्ते। तथा सति मनुष्यविभवस्यात्मनिष्ठता परित्यक्ता स्यात्। यन्त्रादीनामध्ययनं प्रयोगश्च वस्तुनिष्ठया शैल्या प्रचाल्यते; किन्तु मनुष्याः आत्मनिष्ठेन मार्गेणाध्येतव्याः। तस्यान्तःकरणस्य प्रवृत्तिः, वैकारिकभूमिका, वैचारिक मण्डलं इत्यादीन् घटकान् परिगणयदात्मनिष्ठमध्ययनं तदनुसारि निर्वहणं चावश्यकम्। तस्याभावेन मनुष्याणां भावनाविलासः सौन्दर्यसृष्टिपरता मूल्यानि चास्तं यान्ति। एवं मनुष्यविभवस्य मूल्यनिरर्णयोऽपि अपूर्णतां भजन्ते। ते व्यक्तीन् पृथक् परीक्षन्ते। संस्था यदीहते तद्व्यक्तिषु लभते वा न वेति तेऽवलोकयन्ति। दरिद्रं केवलं चेदमवलोकनं मनुष्यविभवानां सामूह्यगुणान् न स्पृशति। केवलव्यक्तिप्रकृतेरेव प्राधान्यकल्पनेन तस्मिन् विलीनाः परोक्षाः तज्जीवातुभूताश्च समष्टिप्रकृतिसमष्टि-धर्मादयोऽगोचरत्वं भजन्ते।इयं मनुष्यविभवोपभोगस्य वस्तुनिष्ठो सङ्केतः निर्मानवानेव लोकान् संस्थासूत्पादयन्तीति वक्तुं शक्यते।

यथा सेव्यसेवकभावाभ्यांमनुष्यविभवस्य केवलंद्विप्रकारकत्वमेवेति केचन मन्यन्ते[2], तथैव स्मृतीनामपि व्याख्यानं कर्तुं बहवः कृतप्रयत्नाः भवन्ति। मनुष्यविभवः वर्णधर्मैः चतुर्धा विभक्त इति गीतासु दृश्यत इति केचन मन्यन्ते। गीतादर्शनमेव वर्णसिद्धान्तेनानुस्यूतमिति तेषां मतम्। भगवद्गीतायाः समाजवीक्षणमपि वर्णधर्मानुसार्येवेति च[3]। अद्वैतवादेऽचञ्चलतया तिष्ठन्नपि वर्णाश्रमधर्मानुसारिणीं सामूह्यव्यवस्थां तद्गतविश्वासांश्च निर्बाध्यतया संरक्षितुं श्रीशङ्करप्रभृतयः बद्धश्रद्धाः इति केचनाभिप्रयन्ति[4]। किन्तु मनुष्यविभवस्य नैतिकः सम्पूर्णः सफलश्च विनियोगः आत्मज्ञानेन श्रद्धया च सम्भवतीत्याचार्यस्वामिनां मतम्[5]। जनकादयो जीवन्मुक्ताः

राजर्षयः समाजस्य हितायैव कर्माकुर्वन्निति ज्ञातव्यम्। भक्तियोगः मनुष्यं व्यष्टेः समष्टि मुन्नयतीति रामानुजाचार्यः गीतां मनुष्यविभवोत्कर्षस्य वास्तवभूमिकां कल्पयति। एवं माध्वाभिनवगुप्तज्ञानेश्वर-प्रभृतयोऽपि मनुष्यस्य जन्मकर्मयोस्साफल्याय गीतास ारावबोधोऽनिवार्य इति मन्वते। विभवस्वरूपः मनुष्यः न बाह्यविषयैः शिक्षितव्यः किन्तु स्वप्रयत्नेनैव ज्ञानमण्डले समुद्धरणीय इति गीतायाः उपदेश इति आनीबसन्ट विश्वसिति[६]। भिन्नाविति प्रतीयमानावर्थविशेषौ यद्यपि गीतासु प्रतीयेते, तथापि तावन्योन्यमोतप्रोतत्वेन संबद्धाविति सा सूचयति। भगवद्गीता भौतिकजीवितस्य निराकरणं औदासीन्यबीजं च भवतीति ब्रुवतां विमर्शकारिणां निरासाय रवीन्द्रनाथट ागोरः सूचयति - यत् - आत्मीयतायाः केन्द्रतत्वं न वस्तुत्यागः किन्तु कामत्याग एव; न लोकत्यागः किन्तु अस्मितात्याग एव[७] इति। भगवद्गीता न निवृत्तिपरा किन्तु कर्मपरा अथवा कर्मयोगपर एवेति बालगंगाधरतिलकोऽपि तमनुसरति[८]; यस्मात् मनुष्यः अपापविद्धं सफलं च कर्म अनुष्ठातुं शक्ताः स्युः। जीविताभिनिवेशेषु परीक्षासु च अमन्दा शान्तिमार्गप्रदीपिकैव भगवद्गीतेति महात्मागान्धिश्च प्रस्तौति[९]। भगवद्गीतासु न कोऽपि सन्देशोऽन्तर्भवति; ग्रन्थोऽयं हिन्दुसमुदायतत्त्वानां दार्शनिकं प्रतिपादनमेवेति अम्बेद्कर् अभिप्रैति[१०]। अहिंसाकर्मज्ञानादेः चातुर्वर्ण्यादि सामाजिकव्यवस्थायाश्च दार्शनिकं गीताव्याख्यानं अन्तस्सारशून्यं मूढं च भवतीति स्वमतं स्थापयितुं स प्रयतते। भगवद्गीता चातुर्वर्ण्यस्य संरक्षणाय वरेण्यवर्गाणां सुखजीविताय च प्रणीतः अपलपनीयः ग्रन्थः एव भवतीति तेन वादमुन्नीयते। अव्यवस्थापितायाः संभ्रान्तेः संसारस्य यथार्थानुभवावाप्त्यै निरुपाधिकस्यानादेरनन्त स्य पूर्णस्य च कस्यचित्तत्वस्य भावः अवश्यंभाव्य एवेति गीता विज्ञापयतीति डा. एस्.राधाकृष्णस्य मतम्[११]। बुद्धीच्छाविकाराणां सम्मिश्ररूपः मनुष्यः जीवितानन्दं एभिस्तत्वैरनुभवतीति स गीतां प्रमाणीकृत्य स्थापयति। ब्राह्मणवर्गस्य कालिकसुविधायै प्रयुक्तं परस्परविरुद्धानां तत्त्वानां सङ्कलनमेव भगवद्गीतेति चरित्रकारः डी डी कोसाम्बी अभिप्रैति[१२]। गीतासु आरोपिताः एते दोषाः नीतिरहिताः युक्तिहीनाश्च भवन्तीति स्वतन्त्रचिन्तकः ए.एल्. बषां विस्तरेण प्रतिपाद्यते[१३]। मनुष्यनिराकरणरूपस्य व्यवस्थास्थापनरूपस्य च फासिसस्य परीक्षणग्रन्थ एव भगवद्गीतेति एं.एन् विजयन् चिन्तयति[१४]। मनुष्यान् ब्राह्मणव्यवस्थाधीनान् कर्तुं उपदेशैर्भ्रान्तिं संक्रामयितुञ्च गीता प्रयतत इति स विश्वसिति।

एवं बहवः चिन्तकाः नेतारः पण्डिताश्च विभवरूपं मनुष्यमधिकृत्य भगवद्गीतायाः आदेशविषये स्वमतं प्रकाशितवन्तः। सामान्येन

विमर्शकाः सर्वेऽपि वर्णाश्रमादिव्यवस्थामेव निरन्तरं अक्षिप्तवन्तः इति पूर्वोक्तेभ्यो परामर्शेभ्योऽवगम्यते। किन्तु गीताप्रतिपादितेयं सामूह्यव्यवस्था मनुष्यविभवनिर्वहणे कथं स्वप्रभावमाकलयतीति अथ विचार्यते।

समीक्षा

वर्णव्यवस्था आश्रमव्यवस्था च मनुष्यं अनिवार्यतयानुगन्तव्यं कमपि लक्ष्यं प्रति सुतरां विधत्ते। समाजरूपायाः संस्थायाः प्रचालनाय सुचरिताय क्षेमाय च समतुलितो विकासः नान्तरीयक एव भवति। मनुष्यविभवनिर्वहण तत्त्वमनुसृत्य कार्यविभजनस्य अतिमहत्प्राधान्यं वर्तते। तत्र श्रद्धेयाः बहवोऽंशाः वर्तन्ते। ऐदंप्राथम्येन संस्थायाः लक्ष्यविशेषाः प्रविधयश्चावगन्तव्याः। अनन्तरं मनुष्यविभवेभ्यो संस्था किं वाञ्छतीति पार्थक्येनैवाधिगन्तव्यम्। तथा सति संस्थायाः आभ्यन्तरात् बाह्यतश्च सामूह्यमार्थिकं च पर्यावरणमधिकृत्य अवबोधोऽवाप्तव्यः। संस्थायाः वाञ्छां पर्यावरणस्य स्थितिञ्चावलोक्य विभवान् मनुष्यान् विभज्य व्यवस्थापयेत्। वाञ्छाव्यवस्थापनयोर्मिथः तुलना आवश्यकी। विभवानां मनुष्याणां विकासाय उन्नतये च प्रचोदकाः प्रविधयः अनुसार्याश्च भवन्ति[१५]। एतेऽंशाः गीतानुसारिण्यां वर्णाश्रमादिसामाजिकव्यवस्थायां सरलया सुतार्यया च शैल्या प्रवृत्तपूर्वाः एव। -चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः[१६]- इत्यत्र विभवस्य मनुष्यस्य संविधानेऽवलंबनीयाः अंशाः गुणकर्मादय एवेति स्पष्टमुपपाद्यते। तत्र समाजस्य राष्ट्रस्य चोन्नतये अधिष्ठानभूतानामंशानां शिक्षारक्षावाणिज्यकृषिवृत्त यादीनां सुस्थिरतायै व्यवस्थेयमुपपद्यते। यथा संस्थाः प्रशिक्षिताननुभवसम्पन्नांश्च कार्यकारिणः स्वीकर्तुमुत्सहन्ते तथा व्यवस्थायामस्यां परम्परायाः प्राधान्यं विधत्ते। विभवानां समतां विकासञ्च समाजे नितरां प्रचोदयेदिति च गीतासु निर्दिश्यते[१७]।

हेन्ट्री फोर्ड् इति प्रशस्तः याननिर्माता लोके कार् यानस्य प्रचुरप्रचारे हेतुभूतः। याननिर्माणस्य प्रारम्भे मनुष्यविभवनिर्वहणस्य अपर्याप्ततया बह्व्यः दुष्करताः अभवन्। तासां परिहाराय स असम्ब्ली लाइन् इति कामपि प्रणालीं रूपीचकार। तदनुसारेण स याननिर्माणस्य प्रक्रियां बहुप्रकारेण विभज्य तास्वेकैकां प्रक्रियां प्रत्येकं मनुष्यविभवेभ्यः प्रायच्छत्। ततः कश्चन कर्मकारी एकमेव कर्म कर्तुं नियुक्तोऽभवत्। स तस्मिन् कर्मणि एव बद्धश्रद्धः निपुणः आप्तजवश्चाभवत्। पूर्वं एकस्य यानस्य निर्माणाय या वेला उपयुक्ता आसीत् तया वेलया शतशः

यानानि निर्मितानीत्यस्याः प्रणाल्याः प्रयोगस्य साफल्यं प्रदर्शयति। प्रणाल्याः अस्याः दार्शनिकं सामाजिकं च तत्त्वमेव गीतायां वर्णाश्रमव्यवस्थया मनुष्यविभवनिर्वहणाय प्रवृत्तमिति स्वधर्मानुष्ठानस्य माहात्म्यप्रतिपादनेषु व्यक्तमेव[८]।

व्यवस्थेयं गीतासम्मता मनोविज्ञानदृष्ट्यापि साङ्गत्यं भजति। आधुनिकमनोवैज्ञानिकैः मनोरोगाः यूणिपोलार् बैपोलार् चेति सामान्येन द्विधा विभक्ताः। उभयोरपि विभागयोः हेतुभूताः दैहिकाः जनितकपराः त्रासपराश्चांशाः भवन्ति। अन्ये च मानसिकसामाजिकघटकाः सामाजिकसांस्कृतिकघटकाश्च उभयोः रोगविभागयोः हेतुत्वेनाधीयन्ते। तत्र सामाजिकसांस्कृतिकघटकेषु प्रवृत्तानि कानिचनाध्ययनानिमनुष्यविभवनिर्वहणे गीताप्रतिपादितस्य आशयस्य साङ्गत्यं प्रदर्शयन्ति। आफ्रिकादेशस्य पूर्वभागे निवसतां गोत्रवर्गजनानां मध्ये विषादाधिष्ठिताः उन्मादाः न्यूनातिन्यूनाः भवन्ति। तैः जीवितसमस्यासु पराजयेषु दौर्भाग्येषु च न व्यक्तिगतः दोषारोपः क्रियते। तेषां संस्कृतौ सर्वे समूहव्यवस्थापराः भवन्ति। अतः न कोऽपि स्वेच्छाचारी, परधर्मेच्छुः, परित्यक्तव्यवस्थः, स्वतन्त्रम्मन्यो वा भवति। तेषां मनसि स्वीयव्यवस्थायाः धर्मानुष्ठानस्य चोपरि प्रलोभकारिणः कामाः न लब्धप्रतिष्ठाः भवन्ति। ते परम्पराधर्मेषु विनीताः अभिमानिनश्च वर्तन्ते। किन्तु पाश्चात्येषु स्वतन्त्रतावाञ्छया, स्वेच्छाचारेण, सोष्यलिसप्रभृतीनां दर्शनानां प्रभावेन च जनाः समाजबोधात् पारम्पर्यात् चात्मानं संगृह्य व्यक्त्यभिमाने चञ्चले प्रतिष्ठापितवन्तः; यस्मात् तेषु भ्रान्तिजन्यभीतिप्रभवाः कामप्रभवाश्च उन्मादाः समजायन्त[९]। अध्ययनमिदं स्वधर्मानुष्ठानस्य तथा तत्प्रचोदकभूतायाः वर्णाश्रमादिव्यवस्थायाश्च मनुष्यविभवनिर्वहणगतं साङ्गत्यमवगमयतीत्यत्र विस्तारो नावश्यकः।

राष्ट्रस्वरूपायाः संस्थायाः विभवभूतस्य मनुष्यस्य च हितायैव स्वधर्माचारणाधारिताः व्यवस्थाः प्रवर्तन्त इत्याप्ताः पण्डिताश्च साक्ष्यं वदन्ति। अर्जुनविषादयोगमधिकृत्य आचार्यविनोबभावे एवं भणति - अत्यन्तविगुणोऽपि मनुष्यः स्वधर्मेऽधिष्ठायैव आत्मविकासमाप्नुयात्। तेनैव केवलं विकासः भवेत्। तत्र नाहन्तामममतयोः समस्या भवेत्। स्वधर्मः महत्वाद्धेतोः स्वीकार्यः अणीयस्त्वाद्धेतोः परित्याज्यः वा न भवति। नायं महान् नाणीयांश्च। स्वधर्मः प्रतिमानवं परिपक्वं भवति। सुकरत्वे सुखदत्वेऽपि परधर्मो न स्वीकार्यः। परधर्मस्य सुकरत्वं सुखदत्वं च आभासविशेषावेव। स्वधर्मानुष्ठाने श्रेष्ठकनिष्ठसरलकठिनादिभेदाः न वर्तन्ते। अतः स्वधर्माचरणविघातभूतस्य मोहस्य निवारणायैव गीता प्रवर्तत[१०] - इति।

भगवद्गीता नैष्कर्म्यमुपदिश्य मानवान् कर्मविमुखान् विधत्तेऽलसांश्च कुरुत इति केचनाभिप्रयन्ति। मनुष्यस्य वैभवं पूर्णतयोपयोक्तुमेव गीता प्रयतत इति सारं संलक्ष्य डो. एस्. राधाकृष्णन् सन्देहस्यास्य समाधानं प्रददाति - नैष्कर्म्यं अथवा कर्मविमुखता न गीतासम्मतो सदाचारः ; किन्तु कर्मफलौदासीन्यमुद्दिश्यते नैष्कर्म्येण। भूमौ न विश्रमः, किन्तु जीवितमेव सर्वदा सम्पद्यते। लोकचक्रस्य गतेः निर्धारकं कर्म भवति। व्यक्तयः सर्वे फलाकाङ्क्षारहितेन स्वधर्मविशिष्टेन च कर्मणा गतिमिमां परिपालयितुं प्रतिज्ञाबद्धाः भवन्ति। गीतापद्धतिः कर्मणः आह्वानमेवेति तदाऽवगम्यते[२१] - इति। वचनमिदं मनुष्यविभवस्य युक्तः, पूर्णः, सफलश्चोपयोगः कथमाकलनीय इति गीतासु क्रमबद्धया शैल्या वर्णिताः इति सूच्यते।

मनुष्यविभवनिर्वहणं प्रत्येकं कार्यनिर्वहणाय क्रियत इत्यादावेवोपपादितम्। तत्संविधाने कार्यनिर्वहणाय या पद्धतिराविष्क्रियते सा चतुर्धा विभज्यते। तत्र प्रथमः उद्देशलक्ष्येषु तस्याः प्रवृत्तिर्भवति। द्वितीयः भागः निर्वाहकस्य कर्तव्येषु तस्याः औन्नत्यम्। तृतीयस्तु पद्धत्याः व्यापनक्षमता। चतुर्थः पद्धत्याः फलप्राप्तये प्रवृत्तानां योग्यता च वर्तते। गुरोः नित्यचैतन्ययतेर्मतानुसारेण भगवद्गीतायाः प्रथमेऽध्याये एव एते घटकाः प्रकाशिताः भवन्ति[२२]। मनुष्यविभवनिर्वहणं अद्य वस्तुनिष्ठया शैल्या प्रवर्तते। किन्तु तस्य संविधानस्य आत्मनिष्ठं निर्वहणमेव सफलं निर्दोषं च स्यादिति प्रबन्धस्यास्य पूर्वभागे प्रतिपादितम्। तस्याशयस्य प्रमाणभूतानि गुरोर्वचनानि सूच्यन्ते - सर्वेष्वपि निर्वहणेषु सम्पादनीया विभवशेषिरेव प्रामुख्यं भजते। नवीनलोके मूलधनं भौतिकवस्तुजालञ्च प्राधान्यमर्हतः। किन्तु तत्तुल्यमेव प्राधान्यं मनुष्यविभवशक्तेश्च प्रदातव्यम्। मनुष्यविभवशक्तिः आत्मनिष्ठेन मार्गेणैव समीक्षणीया[२३] - इति।

एवं मनुष्यविभवनिर्वहणे भगवद्गीतया या शैली पुरस्क्रियते सा संस्थायाः समाजस्य वा समष्टिलक्ष्येषु समष्टिप्रयत्नेषु समष्ट्यनुभवेषु च कृताधाराः वर्तन्त इत्यवगन्तुं शक्यते। तादृश्यां संविधानपद्धत्यां समाजे प्रवर्तयतां विभागान्तराणां मध्ये न कश्चिदपि सङ्घर्षः समुद्भूयते; येन आर्थिकी सामाजिकी च समतुलनाहीनता समुत्पद्येत। व्यक्तीनां समुदायानाञ्च याः वाञ्छाः वर्तन्ते तासां हितकारी समन्वयः एव मनुष्यविभवनिर्वाहकस्य कर्तव्य इति गीतायाः उपदेशः।

उपसंहारः

अर्जुनविषादयोगादारभ्य भगवद्गीतायां यो विषयः प्रतिपाद्यते, स विमर्शकानां प्रलपनवत् नान्तस्सारशून्यः, अन्योन्यबन्धशून्यः, असम्बन्धश्च न भवति। किन्तु अर्जुनविषादयोगे समाजस्य वैषम्यभूमिकां प्रदर्श्य आत्मनिष्ठेन मनुष्यविभवनिर्वहणेन तत्परिहारं विधत्ते। मनोवैज्ञानिकैः व्यक्तित्ववैकल्यादीन् मनोरोगान् दूरीकर्तुं या शैली अनुवर्त्यते सा गीतासंविधानेनानेन अत्यन्तसामीप्यं भजते। वस्तुनिष्ठया केवलया च शैल्या एव मनुष्यप्रकृतिमशेषेणावगन्तुं न शक्यते; यथाऽवगत्या मनुष्यविभवः प्रचोदितः स्यात्। अतः यादृशेन वीक्षणेन विभवोऽयं समाधत्ते तद्वीक्षणं , संविधानं, व्यवस्था वा तत्तन्निष्ठां बहुमुखतां विविधतां बहुस्वरताञ्च भजेत। स्वधर्मपालनव्यवस्था तादृशी काचन संविधानशैली भवति। स्वधर्मानुसारेण यदि विभवाः मनुष्याः न विभक्ताः तर्हि समाजरूपिणी संस्था स्तब्धा भवेत्। गुरोः नित्यचैतन्ययतेः वचनान्येवोद्धृत्य इदमुपसंहियते - जीविते निर्वहणपरान् प्रश्नानभिमुखीकुर्वन्तस्सर्वेऽपि संतृप्तस्य जीवितसमन्वयस्य रीतिशास्त्रं भगवद्गीतायाः एव अवाप्नुयुः[२४] इति।

ग्रन्थसूची

1. Human Resource Management, Handbook of P.G Applied Psychology, Bharathiyar University, Coimbatore 2012 - 1.3.4
2. www.smallbusiness.chron.com%2Fdisadvantages-human-resource-management-system- 60315.html
3. Somasekharan.Ed.Bhagavadgita-Palakalam Palakazhchakal. Sign Books TVM, 2nd Edition, 2010. page 37
4. Somasekharan.Ed.Bhagavadgita-Palakalam Palakazhchakal. Sign Books TVM, 2nd Edition, 2010. page 50
5. Bhagavadgita, Commentary of Sree Sankaracarya, Chowkhamba Sanskrit Series, 2005, 4.15 & 3.20
6. T P Shivadas.Trans.Bhagavadgita, commentery of Anniebesant. School of Bhagavad Gita. TVM 2008
7. Dent.J.M. Preface of Tagore in Hindu Scriptures. London.1938

8. Thilakan Bala Gangadhara.Gitarahasyam. . Nityabharati books, Chengannur, Translated by Acarya Narendra Bhushan, 1989. Page 66
9. Gandhi M.K. The Essence of Hinduism. Navajivan Publishing House. Ahmedabad.1996
10. www.ambedkar.org/Revolution%20and%20Counter%20Revolution%20in%20Ancient India%20.html
11. Bhagavadgita-Palakalam Palakazhchakal. Edited by Somasekharan, Sign Books TVM, 2nd Edition, 2010. page 320
12. Kosambi.D.D .Myths and Reality. Popular Prakasan, Bombay, chapter 4
13. Basham.A. L. The Origins and development of Classical Hinduism. Oxford University Press. 1989
14. Somasekharan.Ed.Bhagavadgita-Palakalam Palakazhchakal. Sign Books TVM, 2nd Edition, 2010. page 616
15. Human Resource Management, Handbook of P.G Applied Psychology, Bharathiyar University, Coimbatore 2012 - 5.4.1
16. Sreemadbhagavadgita.4.13
17. Sreemadbhagavadgita.5.18,6.5,9.22,9.32
18. Sreemadbhagavadgita.2.31,2.33
19. Psychopathology and Mental Hygiene, Handbook of P.G Applied Psychology, Bharathiyar University, Coimbatore 2012 - Page 199,200
20. Krishna Warrier.Trans.Gitapravacanam of Vinobabhave.Current books.1988
21. Somasekharan.Ed.Bhagavadgita-Palakalam Palakazhchakal. Sign Books TVM, 2nd Edition, 2010. page 347
22. Guru Nitya Chaitanya Yati. The Gita; A Managerial Science.
23. Guru Nitya Chaitanya Yati.The Gita; A Managerial Science.
24. Guru Nitya Chaitanya Yati.The Gita; A Managerial Science.